# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- नवम्बर/दिसम्बर-२०१६

कक्षा – **शास्त्री-०३ सेमेस्टर-०५** **प्रश्नपत्रम्- ०७** गुणाः - ७०

विषयः– नव्यव्याकरणम् कोड – CE-3.5.9 समयः – ११:०० तः ०२:००

दिनाङ्कः – ०१/१२/२०१६ ग्रन्थः – परिभाषेन्दुशेखरः, वाक्यपदीयञ्च

---

**प्रथमान्वितिः (युनिट- १)**

| | | |
|---|---|---|
| **प्रश्नः १** | **कयोश्चिद् द्वयोः परिभाषयोः व्याख्या विधेया।** | **08** |
| **(क)** | सर्वो द्वन्द्वो विभाषयैकवद्भवति। | |
| **(ख)** | सकृदगतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव। | |
| **(ग)** | परान्नित्यं बलवत्। | |
| **प्रश्नः २** | **ग्रन्थोक्तदिशा एकस्य विवेचनं कुरुत।** | **08** |
| **(क)** | पूर्वपरनित्यान्तरङ्गपवादानामुत्तरोत्तरं बलीयः | |
| **(ख)** | शब्दान्तरस्य प्राप्नुवन्तिधिरनित्यो भवति। | |
| **प्रश्नः ३** | **प्रदेत्तेषु द्वयोः टिप्पणीं लिखत।** | **04** |
| **(क)** | सर्वे विधयश्छन्दसि विकल्प्यन्ते। | |
| **(ख)** | प्रकृतिवदनुकरणं भवति | |
| **(ग)** | पुनः प्रसङ्ग विज्ञानात्सिद्धम् | |
| **(घ)** | एकदेशविकृतमनन्यवत्। | |
| **प्रश्नः ४** | **पञ्चानां लघूत्तराणि लेख्यानि।** | **05** |
| **(क)** | प्राग्दीव्यतोऽण् इति सूत्रं कस्याः परिभाषायाः ज्ञापकम्? | |
| **(ख)** | परिभाषेन्दुशेखरस्य द्वितीयप्रकरणास्य नाम किम्? | |
| **(ग)** | को नाम विप्रतिषेधः? | |
| **(घ)** | श्रीशः इत्यत्र यणादेशं बाधित्वा सवर्णदीर्घः कस्मात् भवति? | |
| **(ड)** | ‘एकदेशविकृतम्’ इत्यस्यार्थः कः ? | |
| **(च)** | ‘व्यपदेशिवद्भाव’ इत्यस्य तात्पयार्थः कः ? | |
| **(छ)** | अन्तरङ्गत् कः बलीयः? | |

**द्वितीयान्वितिः (युनिट- २)**

| | | |
|---|---|---|
| **प्रश्नः ५** | **द्वे परिभषे व्याख्येये** | **08** |
| **(क)** | नाजानन्तर्ये बहिष्ट्व प्रक्लृप्तिः। | |
| **(ख)** | अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते | |
| **(ग)** | अकृतव्यूहाः पाणिनीयाः | |
| **प्रश्नः ६** | **‘असिद्धं बहिरङ्गमन्तरङ्गे इत्यस्याः शास्त्रोक्तरीत्या स्पष्टयत।** | **08** |

**अथवा**

**‘ वर्णादाङ्गं बलीयोभवति’ इति परिभाषायाः सोदाहरणं वर्णनं कुरुत।**

| | | |
|---|---|---|
| **प्रश्नः ७** | **अधस्तनेषु द्वयोः टिप्पणीं लिखत।** | **04** |
| (क) | पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमन्तरङ्गेऽव्येकादेशो न | |
| (ख) | अन्तरङ्गादप्यपवादो बलवान्। | |
| (ग) | कार्यस्थितौ नियामकं तदनियामकञ्च। | |
| (घ) | न ह्यन्तरेण गुणवृद्धी असवर्णपराभ्यासो भवति | |
| **प्रश्नः ८** | **पञ्च प्रश्नाः समाधेयाः।** | **05** |
| (क) | अन्तरङ्गकार्यं किम्? | |
| (ख) | 'अपवाद' इत्यस्य कोऽर्थ? | |
| (ग) | 'ऊह' शब्दस्य कोऽर्थ? | |
| (घ) | 'पाणिनीयाः' इति पदस्य व्युत्पत्तिः का? | |
| (ङ) | अन्तरङ्गबहिरङ्गयोः कार्ययोः कस्य सिद्धिभविति? | |
| (च) | कीदृशस्य सूत्रस्य अपवादो भवति? | |
| (छ) | परिभाषेन्दुशेखरे कति प्रकरणानि सन्ति? | |

**तृतीयान्वितिः (युनिट-३)**

| | | |
|---|---|---|
| **प्रश्नः ९** | **अधस्तनासु कारिकासु द्वयोः व्याख्या कार्या।** | **08** |
| (क) | अर्थप्रवृतितत्वानां शब्दा एव निबन्धनम्<br>तत्वाऽवबोधः शब्दानां नास्ति व्याकरणा दृते॥ | |
| (ख) | नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।<br>सूत्राणां सानुतन्त्राणां भाष्यणाञ्च प्रणेतृभिः | |
| (ग) | यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः।<br>तथैवलोके विद्यानाम् एषा विद्या परायणम्। | |
| **प्रश्नः १०** | **ग्रन्थोक्त दिशा शब्दस्य नित्यत्वम् विवेचयत।** | **08** |

**अथवा**

| | | |
|---|---|---|
| | **सशास्त्रं शब्दब्रह्मणः स्वरूपं निरूपयत।** | |
| **प्रश्नः ११** | **एकस्य टिप्पणीं लिखत।** | **02** |
| (क) | शब्दब्रह्मस्वरूपम्। | |
| (ख) | वेदमाहात्म्यम्। | |
| **प्रश्नः १२** | **द्वयोः लघूत्तरं लेखनीयम्** | **02** |
| (क) | अनादिनिधनम् इत्यस्य विग्रहो विधेयः। | |
| (ख) | तद् द्वारमपवर्गस्य इत्यस्यार्थः कः। | |
| (ग) | वेदस्य प्रधानम् अङ्गं किम्? | |
| (घ) | शब्दार्थसम्बन्धाः कीदृशाः समाम्नाताः? | |

***